# Rishigautamaproktam Divyashivanamaih Shivarchanopadesham

# ઋષિગૌતમપ્રોક્તં દિવ્યશિવનામૈઃ શિવાર્ચનોપદેશમ્

## Document Information

Text title : Rishigautamaproktam Divyashivanamaih Shivarchanopadesham

File name : divyashivanAmaiHshivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 23| 146-180||

See corresponding nAmAvalI

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 20, 2024

*sanskritdocuments.org*

Rishigautamaproktam Divyashivanamaih Shivarchanopadesham

# ઋષિગૌતમપ્રોક્તં દિવ્યશિવનામૈઃ શિવાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

અનન્યશરણા નિત્યં શિવમેવ ભજન્તિ યે ।
ત એવ ધન્યાઃ શૈવાશ્ચ કૃતકૃત્યા ન સંશયઃ ॥ ૧૪૬॥

ભજન્ત્યનન્યભાવેન ભવાનીરમણં પ્રભુમ્ ।
ભાગ્યવન્તસ્તતસ્તેભ્યો નમો ભૂયો નમો નમઃ ॥ ૧૪૭॥

યેષામન્ત્યતનુર્વિપ્રાસ્ત એવ ગિરિજાપતિમ્ ।
અનન્યભાવાઃ સતતં ભજન્ત્યવ્યભિચારતઃ ॥ ૧૪૮॥

યેન સર્વાણિ કર્માણિ વૈદિકાનિ મહેશ્વરે ।
સમર્પ્યન્તેઽનિશં તેન મુક્તિર્લભ્યા ન સશયઃ ॥ ૧૪૯॥

અત્યન્તદુર્લભા મુક્તિઃ પ્રાપ્યતે શિવપૂજયા ।
તાદૃશી શિવપૂજૈવ કર્તવ્યા વિધિવદ્દ્વિજૈઃ ॥ ૧૫૦॥

પ્રાણાનાયમ્ય સઙ્કલ્પ્ય સ્નાત્વોદ્ધૂલ્ય ચ ભસ્મના ।
ધૃત્વા ત્રિપુણ્ડ્રરુદ્રાક્ષાન્કર્તવ્યં શિવપૂજનમ્ ॥ ૧૫૧॥

મહેશ એવ સમ્પૂજ્યો મુક્ત્યર્થિભિરહર્નિશમ્ ।
યતો મહેશ્વરઃ સામ્બો મુક્તિદઃ સર્વદેહિનામ્ ॥ ૧૫૨॥

ન રુદ્રાદપરો દેવો ભગવાનિતિ ગીયતે ।
તસ્માત્સ ભગવાન્ રુદ્રો ભજનીયો મુમુક્ષુભિઃ ॥ ૧૫૩॥

ભગવન્તમુમાકાન્તં ભજન્તિ ભવભીરવઃ ।
ન રુદ્રાદપરો દેવો ભવભીમભયાપહઃ ॥ ૧૫૪॥

યો "યો વૈ રુદ્ર" ઇત્યત્ર વૈકારો વર્તતે દ્વિજાઃ ।
સ એવકારસ્તેનાન્યયોગ એવ નિષિધ્યતે ॥ ૧૫૫॥

ભગવાન્ રુદ્ર એવેતિ વૈકારેણ વિનિશ્ચિતે ।

રુદ્રાન્યો ભગવાન્કોઽપિ નેતિ નિશ્ચીતે દ્વિજાઃ ॥ ૧૫૬॥

ભગવન્તમુમાકાન્તમનન્યા યે ભજન્તિ તાન્ ।
નમસ્કુર્મો નમસ્કુર્મો નમસ્કુર્મઃ પુનઃ પુનઃ ॥ ૧૫૭॥

ૐ શિવરુદ્રમહાદેવ ભગવન્ શઙ્કરેશ્વર ।
મહેશ્વરેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૫૮॥

સામ્બ શમ્ભો વિરૂપાક્ષ વિષ્ણુબ્રહ્માદિવન્દિત ।
સદાશિવેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૫૯॥

ચન્દ્રશેખર વિશ્વેશ ચન્દ્રસૂર્યાગ્નિલોચન ।
પરાત્પરેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૬૦॥

અનન્તસોમસૂર્યાગ્નિપ્રભાધિક મહાપ્રભો ।
વિશ્વનાથેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૬૧॥

ઉમાકાન્તામરારાધ્ય ભગવન્નીલલોહિત ।
લલાટાક્ષેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૬૨॥

હરામરેશ શૈલેશકન્યાશ્લિષ્ટવપુર્ધર ।
કાલકાલેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૬૩॥

કર્પૂરગૌર કામારે નરસિહ્મનિષૂદન ।
દેવતાસાર્વભૌમેતિ વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૬૪॥

વામદેવામરાધીશ ભસિતોદ્ધૂલનપ્રિય ।
વિશ્વરૂપેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૬૫॥

ભવ શઙ્કર લોકેશ શૂલપાણે મહેશ્વર ।
શિવપ્રિયેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૬૬॥

ઉગ્ર ભીમ ભવારાતે ભર્ગ ત્રિપુરસૂદન ।
નીલકણ્ઠેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૬૭॥

વિષ્ણુનેત્રાર્ચિતાનર્ઘ્ય શરણ્યપદપઙ્કજ ।
મૃત્યુઞ્જયેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૬૮॥

ત્રિકાગ્નિકાલ કાલજ્ઞ કાલકૂટવિષાશન ।
કલિકલ્મષાપહેત્યેવં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૬૯॥

ખટ્વાઙ્ગપાણે સર્વાત્મન્નન્ધકાસુરસૂદન ।
સર્વેશ્વરેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૭૦॥

કૈલાસવાસિન્ ગૌરીશ વૃષાઙ્ક વૃષભધ્વજ ।
સર્વોત્તમેતિ સતતં વદન્ત્વનુદિનં દ્વિજાઃ ॥ ૧૭૧॥

કાશીનાથાવિમુક્તેશ ભવાનીપ્રાણવલ્લભ ।
ઉમાસહાય ચિદ્રૂપ નિરઞ્જન નિરામય ॥ ૧૭૨॥

પરમાત્મેતિ(મરેતિ) સતતં વદન્ત્વનુદિનં દ્વિજાઃ ।
એતાનિ દિવ્યનામાનિ મહેશસ્ય મહાત્મનઃ ॥ ૧૭૩॥

જપનીયાનિ યત્નેન મુમુક્ષભિરહર્નિશમ્ ।
સ્મર્તવ્યોઽસ્માભિરનિશ સ્મરાપસ્મારનાયકઃ ॥ ૧૭૪॥

ન હિ સ્મરહરાદન્યઃ સ્મર્તવ્યોઽસ્માભિરન્વહમ્ ।
અતઃ સંસારનાશાય સ્મર્તવ્યઃ પરમેશ્વરઃ ॥ ૧૭૫॥

શિવનામકુઠારેણ નિર્મૂલાનિ ભવન્તિ હિ ।
સંસારતરુમૂલાનાં પાતકં મૂલમુચ્યતે ॥ ૧૭૬॥

તન્નાશસ્તુ ભવત્યેવ શિવનામસકૃજ્જપાત્ ।
સાદરં ભસ્મદિગ્ધાઙ્ગો વદેચ્છિવ શિવેતિ ચ ॥ ૧૭૭॥

સ સંસારવિનિર્મુક્તો ભવત્યેવ ન સંશયઃ ।
યે કુર્વન્તિ શિવધ્યાનં ભસ્મરુદ્રાક્ષભૂષણાઃ ॥ ૧૭૮॥

તે ભવિષ્યન્તિ વિપ્રેન્દ્રાઃ શેષભૂષણભૂષિતાઃ ।
અનેકજન્મભિર્નિત્યં પુણ્યં બહુકૃત યદિ ॥ ૧૭૯॥

તદા શિવાર્ચને શ્રદ્ધા ભવેન્નામજપેઽપિ ચ ।
શિવેતિ શિવદં નામ યેનોચ્ચરિતમાદરાત્ ॥ ૧૮૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિગૌતમપ્રોક્તં દિવ્યશિવનામૈઃ શિવાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૩। ૧૪૬-૧૮૦॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 23 . 146-180..

Notes:

Ṛṣi Gautama ઋષિ ગૌતમ delivers Upadeśa ઉપદેશ about Worshiping Śiva શિવ with His Divine Names i.e. DivyaŚivaNāmāni દિવ્યશિવનામાનિ (that are enlisted in Śloka-s 158 to 173). He asserts that the axe of Śivanāma શિવનામ uproots the tree of Samsāra સંસાર; and that those who engage in Śivadhyāna શિવધ્યાન - while being adorned with Bhasma ભસ્મ and Rudrākṣa રુદ્રાક્ષ - certainly gain Liberation from the Samsāra સંસાર.
The DivyaŚivaNāmāvaliḥ દિવ્યશિવનામાવલિઃ derived from this Upadeśa ઉપદેશ can be referred to from the link given below.
The Rudrastavaḥ રુદ્રસ્તવઃ Yo vai Rudraḥ યો વૈ રુદ્રઃ, can be referred to from two of the links given below.

Proofread by Ruma Dewan

*Rishigautamaproktam Divyashivanamaih Shivarchanopadesham*

pdf was typeset on June 20, 2024

Please send corrections to *sanskrit@cheerful.com*